ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते ॥
शिक्षा घ्राणन्तु वेदस्य मुखं व्याकरणं स्मृतम् ।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते ॥

उदात्तमाख्याति वृषोऽङ्गुलीनां
प्रदेशिनीमूलनिविष्टमूर्द्धा ।
उपान्तमध्ये स्वरितं धृतञ्च
कनिष्ठिकायामनुदात्तमेव ॥

उदात्तं प्रदेशिनीं विद्यात्प्रचयं मध्यतोऽङ्गुलिम् ।
निहतन्तु कनिष्ठिक्यां स्वरितोपकनिष्ठिकाम् ॥

अन्तोदात्तमाद्युदात्तमुदात्त-
मनुदात्तं नीचस्वरितम् ।
मध्योदात्तं स्वरितं द्व्युदात्तं
त्र्युदात्तमिति नव पदशय्या ॥
अग्निः सोमः प्र वो वीर्य्यं हविषां
स्वर्बृहस्पतिरिन्द्राबृहस्पती ।

अग्निरित्यन्तोदात्तं सोम इत्याद्युदात्तं प्र इत्यु-दात्तं व इत्यनुदात्तं वीर्य्यं नीचस्वरितम् ॥ हविषां मध्योदात्तं स्वरिति स्वरितम् । बृहस्पति-रिति द्व्युदात्तमिन्द्राबृहस्पती इति त्र्युदात्तम् ॥

अनुदात्तो हृदि ज्ञेयो मूर्द्ध्न्युदात्त उदाहृतः ।
स्वरितः कर्णमूले तु सर्व्वास्ये प्रचयः स्मृतः ।
चाषस्तु वदते मात्रां द्विमात्रन्त्वेव वायसः ।
शिखी रौति त्रिमात्रन्तु नकुलस्त्वर्द्धमात्रकम् ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम् ।
न तस्य पाठे मोक्षोऽस्ति पापाहेरिव किल्विषात् ॥
सुतीर्थादागतं व्यक्तं स्वाम्नाय्यं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥

मन्त्रो हीनः स्वरतो वर्णतो वा
मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति
यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

अनक्षरं हतायुष्यं विस्वरं व्याधिपीड़ितम् ।
अक्षता शस्त्ररूपेण वज्रं पतति मस्तके ॥
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्ज्जितम् ।
ऋग्यजुःसामभिर्द्दग्धो वियोनिमधिगच्छति ॥
हस्तेन वेदं योऽधीते स्वरवर्णार्थसंयुतम् ।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते ॥
शङ्करः शाङ्करीं प्रादाद्दाक्षीपुत्त्राय धीमते ।
वाङ्मयेभ्यः समाहृत्य देवीं वाचमिति स्थितिः ॥
येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥
येन धौता गिरः पुंसां विमलैः शब्दवारिभिः ।
तमश्चाज्ञानजं भिन्नं तस्मै पाणिनये नमः ॥
अज्ञानान्धस्य लोकस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै पाणिनये नमः ॥

त्रिनयनमुखनिःसृतामिमां य
इह पठेत् प्रयतश्च सदा द्विजः ।
स भवति धनधान्यपशुपुत्त्रकीर्त्तिमा-
नतुलञ्च सुखं समश्नुते दिवीति दिवीति ॥

अथ शिक्षामात्मोदात्तश्च हकारं स्वराणां यथा सौराष्ट्रिका । गीत्वचोऽसृष्टोदात्तं चाषस्तु शङ्कर एकादश ।” इति वेदशिक्षासमाप्तिमगमत् ॥ * ॥ अपि च ।

अग्निरुवाच ।

“वक्ष्ये शिक्षां त्रिषष्टिः स्युर्व्वर्णा वा चतुराधिकाः ।
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः ॥
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः ।
अनुस्वारो विसर्गश्च ×क⌒पौ चापि पराश्रितौ ॥
दुःस्पृष्टश्चेति विज्ञेयः ऌकारः प्लुत एव च ।
रङ्गश्च खे अराँ इव हकारः पञ्चमैर्युतः ॥
अन्तःस्थाभिः समायुक्तः औरस्यः कण्ठ्य एव सः ।
आत्मा बुद्ध्या समेत्यार्थं मनो युङ्क्ते विवक्षया ॥
मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् ।
मारुतस्तूरसि चरन्मन्द्रं जनयति स्वरम् ॥
प्रातःसवनयोगन्तं छन्दो गायत्रमाश्रितम् ।
कण्ठे माध्यन्दिनयुतं मध्यमं त्रैष्टभानुगम् ॥
तारं तार्त्तीयसवनं शीर्षण्यं जागतानुगम् ।
सोदीर्णो मूर्द्ध्न्यभिहतो वक्त्रमापद्य मारुतः ॥
वर्णान् जनयते तेषां विभागाः पञ्चधा स्मृताः ।
स्वरः कालतः स्थानात् प्रयत्नानुप्रदानतः ॥
अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा ।
जिह्वामूलञ्च दन्ताश्च नासिकोष्ठौ च तालु च ॥
ओ-भावश्च विवृत्तिश्च श-ष-सा रेफ एव च ।
जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः ॥
यद्योभावप्रसन्धानमुकारादिपरं पदम् ।
स्वरान्तं तादृशं विद्यात् यदन्यद्व्यक्तमूष्मणः ॥
कुतीर्थादागतं दग्धमपवर्णञ्च भक्षितम् ।
एवमुच्चारणं पापमेवमुच्चारणं शुभम् ॥
सुतीर्थादागतं व्यक्तं स्वागार्थं सुव्यवस्थितम् ।
सुस्वरेण सुवक्त्रेण प्रयुक्तं ब्रह्म राजते ॥
न करालो न लम्बोष्ठो नाव्यक्तो नानुनासिकः ।
गद्गदो बद्धजिह्वश्च न वर्णान् वक्तुमर्हति ॥
उदात्तश्चानुदात्तश्च स्वरितश्च स्वरास्त्रयः ।
ह्रस्वो दीर्घः प्लुत इति कालतो नियमा अचि ॥
कण्ठ्यावहा वि-चु-य-शास्तालव्या ओष्ठजावुपू ।
स्युर्मूर्द्धन्या ऋ-टु-र-षा दन्त्या ऌ-तु-ल-साः स्मृताः ॥
जिह्वामूले तु कुः प्रोक्तो दन्त्योष्ठ्यो वः स्मृतो बुधैः ।
एऐ तु कण्ठ्यतालव्यौ ओ औ कण्ठ्योष्ठजौ स्मृतौ ॥
अर्द्धमात्रा तु कण्ठ्या स्यात् एकारैकारयोर्भवेत् ।
अयोगवाहा विज्ञेया आश्रयस्थानभागिनः ॥
अचोऽस्पृष्टा यणस्त्वीषन्नेमस्पृष्टाः शरः स्मृताः ।
शेषाः स्पृष्टा हलः प्रोक्ता निबोधानुप्रदानतः ॥
यमोऽनुनासिका न ह्रो नादिनो हझषः स्मृताः ।
ईषन्नादा यणो जश्च श्वासिनश्च खफादयः ।
ईषच्छ्वासांश्चरो विद्याद्गोर्धामैतत् प्रचक्षते ॥”

इत्याग्नेये महापुराणे शिक्षानिरूपणं नाम ३३६ अध्यायः ॥

**शिक्षाकरः**, पुं, (करोतीति । कृ + अच् । शिक्षाया करः ।) व्यासः । इति शब्दमाला ॥ शिक्षाकर्त्तरि, त्रि ॥

**शिक्षागुरुः**, पुं, (शिक्षाया गुरुः ।) विद्यादाता गुरुः । मन्त्राद्युपदेशकर्त्ता दीक्षागुरुः । यथा । इयं हि रसभावविशेषदीक्षागुरोर्विक्रमादित्यस्याभिरूपभूयिष्ठा परिषत् । इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

**शिक्षितः**, त्रि, (शिक्ष + क्तः ।) विज्ञः । इत्यमरः ॥ शिक्षायुक्तः । यथा,—
“आपरितोषाद्विदुषां न साधु मन्ये प्रयोगविज्ञानम् ।
बलवदपि शिक्षितानामात्मन्यप्रत्ययं चेतः ॥”
इत्यभिज्ञानशकुन्तलायाम् १ अङ्कः ॥

**शिक्षिताक्षरः**, पुं, (शिक्षितानि अक्षराणि येन ।) शिक्षाकारी । छात्रः । यथा,—
“स्यादक्षरमुखः कालाक्षरिकः शिक्षिताक्षरः ।”
इति त्रिकाण्डशेषः ॥
(शिक्षिते, त्रि । यथा, राजतरङ्गिण्याम् ।५।८३।
“स सत्यनामा मतिमान् प्रबुद्धः शिक्षिताक्षरः ।
कस्याप्यासीद्गृहपतेरर्भकाध्यापको गृहे ॥”)

**शिखकः** पुं लेखकः । इति संक्षिप्तसारोणादिवृत्तिः ॥

**शिखण्डः**, पुं, मयूरपुच्छः । इत्यमरः । यथा,—
“शिखण्डोऽस्त्री पिच्छवर्हे शिखिपुच्छशिखण्डके ।”
इति शब्दरत्नावली ॥
(यथा, महाभारते । १२ । २८१ । ५८ ।
“वृत्रस्य रुधिराच्चैव शिखण्डाः पार्थ जज्ञिरे ।
द्विजातिभिरभक्ष्यास्ते दीक्षितैश्च तपोधनैः ॥”)
चूड़ा । इति मेदिनी ॥

**शिखण्डकः**, पुं, (शिखण्ड इव । कन् ।) काकपक्षः । इत्यमरः । जुल्पी इति भाषा । “द्वे क्षत्त्रियकुमाराणां शिखात्रये । उक्तञ्च ।
‘बालानाञ्च शिरः कार्य्यं त्रिशिखं मुण्डमेव चेति ।’
शिखापञ्चके इत्यन्ये । सामान्येन चूड़ायामित्यन्ये । काकपक्षाकारत्वात् काकपक्षः । शिरसि खण्डते शिखण्डकः मनीषादिः तालव्यादिः । शिखण्डे तु शिखावर्हे इति तालव्यादौ रभसः । शिखाण्डकश्च । शिखण्डकशिखाण्डकाविति वाचस्पतिः ।” इति तट्टीकायां भरतः ॥
(यथा, रघुः । ११ । ५ ।
“तौ पितुर्नयनजेन वारिणा
किञ्चिदुक्षितशिखण्डकावुभौ ।
धन्विनौ तमृषिमन्वगच्छतां
पौरदृष्टिकृतमार्गतोरणौ ॥”)
मयूरपुच्छे, क्ली च ॥ इति शब्दरत्नावली ॥

**शिखण्डिकः**, पुं, (शिखण्डीव कायति शब्दायते इति । कै + कः । यद्वा, शिखण्डोऽस्यास्तीति । शिखण्ड + ठन् ।) कुक्कुटः । इति हेमचन्द्रः ॥